"विविधनवांशुकमृगमदचन्दनकर्पूरमरिच
पूगफलैः ।
खटिकाहस्तः स सदा गणयति कोटीर्मुहूर्त्तेन ॥")
कर्णरन्ध्रम् । वीरणम् । इति विश्वः ॥

खटिनी, स्त्री, (खट् + बाहुलकात् इनिः । ङीप् च ।) खटी । इति राजनिर्घण्टः ॥ (यथा, हितोपदेशे ।
"न पतति खटिनी ससम्भ्रमा यस्य महद्गण-
नायाम् ॥")

खटी, स्त्री, (खट् + अच् । गौरादित्वात् ङीष् ।) लेखनद्रव्यम् । खड़ी इति भाषा । तत्पर्य्यायः । खटिनी२ खटिका३ धवलमृत्तिका४ सितधातुः५ पाण्डुमृत् ६ पाण्डुमृत्तिका ७ । अस्या गुणाः । मधुरत्वम् । तिक्तत्वम् । शीतलत्वम् । पित्तदाहव्रणदोषकफासनेत्ररोगनाशित्वञ्च । इति राजनिर्घण्टः ॥ अस्याः पर्य्यायान्तराणि कठिनीशब्दे द्रष्टव्यानि ॥ (यथास्याः पर्य्याया गुणाश्च भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"खटिका कठिनी चापि लेखनी च निगद्यते ।
खटिका दाहजिच्छीता मधुरा विषशोथजित् ॥
लेपादेतद्गुणाः प्रोक्ता भक्षिता मृत्तिका समा ।
खटी गौरखटी द्वे च गुणैस्तुल्ये प्रकीर्त्तिते ॥")

खट्ट, क वृतौ । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) टद्वयान्तः । क, खट्टयति । वृतिः संवरणम् । इति दुर्गादासः ॥

खट्टनः, त्रि, (खट्ट्यते व्रियते शय्यादिभिः इति । खट्ट वृतौ + कर्म्मणि ल्युट् ।) खर्व्वः । इति हेमचन्द्रः । छोट इति भाषा ॥ खट्टत इति पाठोऽपि दृष्टः ॥

खट्टा, स्त्री, (खट्ट + टाप् ।) खट्वा । इति शब्दचन्द्रिका ॥

खट्टाशः, पुं स्त्री, (खट्टः आत्मा वृतः सन् अश्नाति इति । अश् + अच् । अश्नुते व्याप्नोति गात्रगन्धेन वा । अशूङ् व्याप्तौ + अच् ।) वनजन्तुविशेषः । खटाश इति गन्धगोकुला इति च भाषा । तत्पर्य्यायः । गन्धौतुः २ वनवासनः ३ । इति त्रिकाण्डशेषः ॥ खट्टाशी४ वनाखुः५ । इति शब्दरत्नावली ॥ खट्टासः ६ गन्धमार्जारः ७ वनम्बा ८ शालिः ९ । इति जटाधरः ॥ पुष्पलकः १० । इति दुर्गादासधृतवचनम् ॥

खट्टासः, पुं, (खट्टाश + पृषोदरात् शकारस्य सत्वम् । यद्वा, खट्ट इवासति दीप्यते प्रकाशते । अस दीप्तौ + अच् ।) खट्टाशः । इति जटाधरः ॥ (लक्षणमस्य यथा भैषज्यरत्नावल्यां वातव्याध्यधिकारे ।
"खट्टासोऽनूपजः श्रेष्ठो वर्त्तुलो मांसलश्च यः ।
सम्मतो मध्यदेशीयो मध्यमो मरुजोऽधमः ॥")

खट्टिः, पुं, (खट्ट + इन् ।) शवयानम् । तत्पर्य्यायः । चमशव्या २ टाकठः ३ । इति त्रिकाण्डशेषः ॥

खट्टिकः, त्रि, (खट्टनं आवरणं खट्टः स शिल्पत्वेनास्यास्तीति । ठन् ।) शाकुनिकः । इति शब्दमाला । पाखिमारा इति भाषा ॥

खट्टिका, स्त्री, (खट्ट + स्वार्थे स्वल्पार्थे वा कन् + टाप् अत इत्वञ्च ।) क्षुद्रखट्वा । तत्पर्य्यायः । निषद्या २ मन्द्री ३ । इति त्रिकाण्डशेषः ॥ आसन्दी ४ । इति जटाधरः । शवयानम् । इति शब्दमाला ॥

खट्टेरकः, त्रि, (खट्ट + बाहुलकात् कर्म्मणि एरक् ।) खर्व्वः । इति शब्दमाला ॥

खट्वा, स्त्री, (खटाते काङ्क्ष्यते शयनार्थिभिरिति । खट् काङ्क्षायां + "अशूप्रुषिलटीति ।" उणां १ । १५१ । इति क्वन् ।) काष्ठादिरचितशय्याधारः । खाट् इति भाषा । तत्पर्य्यायः । शयनम् २ मञ्चः ३ पर्य्यङ्कः ४ पल्यङ्कः ५ । इत्यमरः । २ । ६ । १३८ ॥ तल्पम् ६ शयः ७ । इति शब्दरत्नावली ॥ * ॥ तद्युक्तिर्यथा,—
"अष्टाभिः काष्ठखण्डैश्च खट्वेति प्रतिपद्यते ॥"
अथैषां नामानि ।
"तिष्ठेत् यदाश्रया खट्वा तच्चतुष्कं चरणाह्वयम् ।
शिरःस्थं षुपधानं स्यात् अधःस्थं स्यात् निरूपकम् ॥
आलिङ्गने उभे पार्श्वे प्राह भोजमहीपतिः ।
आलिङ्गने चतुर्हस्ते षुपधाननिरूपके ॥
तदर्द्धेन तदर्द्धेन चत्वारश्चरणा इति ।
सर्व्वषोड़शिका खट्वा सर्व्वत्राभयदायि ॥
आलिङ्गने सार्द्धवेदे षुपधाननिरूपके ।
सार्द्धद्वये च चरणा हस्तैकपरिसम्मिताः ॥
सर्व्वाष्टादशका खट्वा सर्व्वकामफलप्रदा ।
आलिङ्गने पञ्चहस्ते षुपधाने निरूपके ॥
तदर्द्धेन तदर्द्धेन चत्वारश्चरणा इति ।
सर्व्वविंशतिका खट्वा धनधान्यजयप्रदा ॥
आलिङ्गने पञ्चहस्ते षुपधाने निरूपके ।
त्रिहस्तसम्मिते पादा हस्तैकपरिसम्मिताः ॥
सर्व्वविंशतिका खट्वा एवमप्युपजायते ।
आलिङ्गने सार्द्धपञ्चे षुपधाने निरूपके ॥
तदर्द्धेन तदर्द्धेन चत्वारश्चरणा इति ।
सर्व्वद्वाविंशिका खट्वा सर्व्वसम्पत्प्रदायिनी ॥
आलिङ्गने च षड्ढस्ते षुपधाने निरूपके ।
त्रिहस्तसम्मिते पादाश्चत्वारश्चरणा इति ॥
चतुर्विंशतिका खट्वा सर्व्वरोगक्षयङ्करी ।
आलिङ्गने सप्तहस्ते षुपधाने निरूपके ॥
त्रिहस्ते सार्द्धहस्ताश्च चत्वारश्चरणा इति ।
सर्व्वषड्विंशिका खट्वा सर्व्वसौभाग्यकारिका ॥
आलिङ्गने सार्द्धसप्ते षुपधाने निरूपके ।
सार्द्धत्रिहस्ते सार्द्धाश्च चत्वारश्चरणा इति ॥
सर्व्वाष्टाविंशिका खट्वा सर्व्वभोगप्रदायिका ।
आलिङ्गने चाष्टहस्ते षुपधाने निरूपके ॥
चतुर्हस्ते सार्द्धहस्ताश्चत्वारश्चरणा इति ।
सर्व्वत्रिंशतिका खट्वा सर्व्वकामार्थदायिनी ॥
एवमष्टविधाः खट्वाः समासेनोपदर्शिताः ।
आदित्यादिदशाजानां नृणां सम्पत्तिदायिकाः ॥
कार्य्याः शिल्पिभिरेतासु विविधाकृतिकल्पनाः ।
सर्व्वषोड़शिका खट्वा सर्व्वेषामेव युज्यते ॥
अष्टौ खण्डानि यस्याः स्युश्चतुर्हस्तयुतानि च ।
श्रीसर्व्वमङ्गला नाम खट्वैषा पृथिवीपतेः ॥
इयं यदा सच्छदना तदा सर्व्वजयाभिधा ।
यात्रासिद्धिः सर्व्वसिद्धिर्विजया चाष्टमङ्गला ॥ * ॥
एकैकहस्तवृद्ध्या तु भवेन्मञ्चमतः परम् ।
जयोऽथ मङ्गलः प्रेयान् चित्रकान्तः परो महान् ॥
एकैकहस्तवृद्ध्या तु मञ्चानामिति लक्षणम् ।
सा तुङ्गा ह्यतितुङ्गा च शिखरी विषयेषणा ॥
एकैकहस्तवृद्ध्या तु टङ्क इत्यभिधीयते ।
यात्रासिद्धिं समारभ्य येऽमी षोड़श कीर्त्तिताः ॥
आदित्यादिदशाजानामाद्यन्तैकद्वयं क्रमात् ।
दूरदर्शी दीर्घदर्शी दुर्लङ्घ्योऽथ दुरासदः ॥
यथोत्तरं दशगुणाः पादैकपरिणाहिनः ।
प्रासादसंज्ञकाः कार्य्या राज्ञा सुखमभीप्सता ॥
चत्वार एते सर्व्वेषां भूपतीनां सुखावहाः ॥" * ॥
भोजमते च ।
"सर्व्वत्रिंशतिकां यावत् आरभ्याभयषोड़शीम् ।
खट्वानामिति नामानि अष्टौ हस्तद्वयाधिकाम् ॥"
तद्यथा,—
"मङ्गला विजया पुष्टिः क्षमा तुष्टिः सुखासनम् ।
प्रचण्डा सर्व्वतोभद्रा खट्वानामाष्टकं विदुः ॥"
आसां विभागः पूर्व्ववत् ॥ * ॥
पराशरसंहितायान्तु ।
"अष्टाभिः काष्ठखण्डैस्तु योऽत्र पिण्डो विजायते ।
स चेत् समो भवेत् खट्वा प्रशस्ता स्यादतोऽन्यथा ॥
समे सर्व्वायसम्पत्तिर्विषमे विषमास्पदम् ।
तस्मात् खट्वाङ्गपिण्डो यः समः कार्य्यः स सूरिभिः ॥"
इदन्तु सामान्यं सर्व्वसम्मतञ्च । काष्ठनियमस्तु पूर्व्ववदेव । इत्यासनयुक्तौ खट्वोद्देशः ॥ * ॥
तस्या दोषगुणा यथा,—
"खट्वायां यो गुणो दोषो मानस्य परिकीर्त्तितम् ।
तेनैव खट्वा काष्ठोत्था तथैव गुणमावहेत् ॥
अनेनैव विधानेन कार्य्यं बहुविधासनम् ।
विना नौकां समं कार्य्यं सर्व्वत्रैवासनं गुरु ॥"
इति तत्रैव युक्तिकल्पतरुः ॥
अस्या गुणः । वातलत्वम् । इति राजवल्लभः ॥ प्रेङ्खा । इत्यमरटीका ॥ कोलशिम्बी । इति राजनिर्घण्टः ॥

खट्वाङ्गं, क्ली, (खट्वाया अङ्गम् । तदिवाकृतिर्यस्य इति ।) शिवस्यास्त्रविशेषः । तत्पर्य्यायः । सुखंसुणः २ ॥ इति हेमचन्द्रः ॥ (यथा, मार्कण्डेये । ८७ । ६ ।
"विचित्रखट्वाङ्गधरा नरमालाविभूषणा ॥")

खट्वाङ्गः, पुं, (खट्वाङ्ग इत्याख्याऽस्य । शिवस्य खट्वाङ्गास्त्रवत् सर्व्वत्र दुर्लङ्घ्यशासनत्वात् अमोघवीर्य्यवत्त्वाच्चास्य तथात्वम् ।) सूर्य्यवंशीयराजविशेषः । स तु विश्वसहराजपुत्त्रः । यथा,— श्रीमद्भागवते । ९ । ९ । ४१ ।
"ततो दशरथस्तस्मात् पुत्त्र ऐड़विड़स्ततः ।
राजा विश्वसहो यस्य खट्वाङ्गश्चक्रवर्त्त्यभूत् ॥"

खट्वाङ्गभृत्, पुं, (खट्वाङ्गं बिभर्त्ति इति । भृ + क्विप् ।) शिवः । इति हेमचन्द्रः ॥

खट्वाङ्गी, [न्] पुं, (खट्वाङ्गं अस्त्रविशेषः सोऽस्यास्तीति इनिः ।) शिवः । इति हारावली ॥ (प्रायश्चित्तार्थं धारणीयं खट्वाङ्गाकृतिकाष्ठखण्डविशेषः । यथा, मनुः । ११ । १०५ ।